जिह्वागतरोगभेदे यथाह सुश्रुतः। "जिह्वागतास्तु कण्टकास्त्रिविधास्त्रिभिर्दोषैरलास उपजिह्विका च" इत्युक्त्वा "जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा। पित्तेन पीता परिदह्यते च चिता सरक्तैरपि कण्टकैश्च। कफेन गुर्वी बहुलाचिता च मांसोद्गतैः शाल्मलिकण्टकाभैः। जिह्वातले यः श्वयथुः प्रगाढ़ः सोऽलाससंज्ञः कफरक्तमूर्त्तिः। जिह्वां स तु स्तम्भयति प्रवृद्धो मूले तु जिह्वा भृशमेति पाकम्"॥ स तु असाध्यरोगः यथोक्तं तत्रैव। "असाध्या अपि वक्ष्यन्ते रोगा ये यत्र यादृशा" इत्युपक्रम्य "जिह्वागतेष्वलासस्तु तालव्येष्वर्बुदं तथा" इत्यभिधाय "असाध्याः कीर्त्तिताह्येते रोगा नव दशैव च"।

**अलि** पु० अलति दंशे, कूजिते, शब्दिते, वा समर्थो भवति अल-इन्। १भ्रमरे, "अलमलिरिव गन्धरसावम्" माघः। "श्यामीभूताः कुसुमसमूहेऽलीनाम्" "मङ्क्षु दधाति पटलैरलीनाम्" इति च माघः "अलिपङ्क्तिरनेकशस्त्वया" कुमा०। २वृश्चिके, ३काके, ४कोकिले, ५वृश्चिकराशौ च स च द्वादशधा विभक्तराशिचक्रस्याष्टमो भागः विशाखाद्यपादानुराधाज्येष्ठारूपः। ६सुरायां च।

**अलिक** न० अल्यते भूष्यते अल-कर्म्मणि इकन्। ललाटे। "असंस्कृतालकिनीमलिकलेखाम्" काद०।

**अलिकुलसङ्कुल** पु० अलिकुलेन सङ्कुलः व्याप्तः। १कुब्जवृक्षे राजनि०। २भ्रमरकुलव्याप्ते त्रि० "अलिकुलसङ्कुल कुसुम निराकुल नवदलमालतमाले" जयदेवः।

**अलिगर्द्द** पु० अलिरिव वृश्चिक इव गर्द्धति गृध-अच्। (आलय) इतिख्याते सर्पभेदे श०र०।

**अलिगु** पु० अलिरिव दुःसहा गौर्वाणी अस्य। गर्गादिगण पठिते ऋषिभेदे। ततः गोत्रे यञ् आलिगव्यः। तदपत्ये पुंस्त्री० स्त्रियां तु लोहिता० ष्फः। आलिगवायनी।

**अलिङ्ग** त्रि० नास्ति लिङ्गं ज्ञापकहेतुश्चिह्नं वा यस्य। १अनुमापकहेतुशून्ये २चिह्नशून्ये च। वेदान्तिमतसिद्धे परमात्मनि पु०। न०त०। लिङ्गभिन्ने ३अननुमापके तच्च सांख्यमते "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितम् लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" सा०का० उक्तमव्यक्तम्। "अकार्य्यं नित्यं व्यापि अक्रियम् एकमनाश्रितमलिङ्गमनवयवं स्वतन्त्रमव्यक्तमिति" सा०त०कौ०। तद्धि न कस्यापि लिङ्गम् कार्य्येण कारणानुमानमिह विवक्षितं तेन संहत्यकारित्वेन परार्थतया तस्य पुरुषानुमापकत्वेऽपि न क्षतिरिति च तत्रानुसन्धेयम् "तदलिङ्गमेकद्रव्यत्वात् कर्म्मणः" वै०सू०। "कर्म्म न तावत् समवायिकारणतया आकाशमनुमापयति कर्म्मण एकद्रव्यत्वात् एकमात्रमूर्त्तसमवायिकारणत्वात्" वै० सू० उ०। ४दुष्टचिह्ने च। [भिन्ने ब्रह्मचारिप्रभृतौ।

**अलिङ्गिन्** त्रि० न लिङ्गी वेशधारी। कपटवेशधारि-

**अलिजिह्वा** स्त्री अलिरिव क्षुद्रा जिह्वा। जिह्वामूलस्थायां क्षुद्र जिह्वायाम् (आलजिभ) स्वार्थे कन् अत इत्त्वम्। तत्रैव।

**अलिञ्जर** पु० अलनमलिः अल-इन् तं जरयति जॄ-अच् पृषो० मुम्। (जाला) इति ख्याते मृण्मये जलाधारे पात्रभेदे मणिके। 'उदकान्तमुपानीय मत्स्यं वैवस्वतो मनुः। अलिञ्जरे प्राक्षिपत्तं चन्द्रांशुसदृशप्रभम्" भा०व०प०।

**अलिदूर्व्वा** स्त्री अलिरिवाकारेण दूर्व्वा। मालादूर्व्वायाम्।

**अलिन्** पु० अलं वृश्चिकपुच्छस्थकण्टकं विद्यतेऽस्य इनि, अल-इनि वा। १वृश्चिके, २भ्रमरे च। 'मलिनिमाऽलिनि माधवयोषिताम्" माघः स्त्रियां ङीप् अलिनी "रमतालिनी शिलीन्ध्रे" माघः।

**अलिन** त्रि० अल-बा० इनन्। पर्य्याप्ते तपोभिरतिप्रवृद्धे। आ पक्थासो भलानसो भनन्तालिनासो विषाणिनः" ऋ० ७।१८।७। "अलिनाः तपोभिरतिवृद्धाः" भा०।

**अलिन्द** पु० अल्यते भूष्यते अल+कर्म्मणि किन्दच्। १द्वार प्रकोष्ठे २ बहिर्द्वारवर्त्तिनि चत्वराकारे प्रदेशे। "यस्यामलिन्देषु न चक्रुरेव मुग्धाङ्गना गोमयगोमुखानि:" माघः ३बहिर्द्वारभागमात्रे ३देशभेदे ४बहुशतासिनि ५तद्राजनि च ब०व०। "अलिन्दाः कालवाश्चैव कुण्ठकाः करटा स्तथा" भा० उ० प० जम्बूखण्डविभागे प्राच्यजनपदकथने। गौरादिगणपाठात् स्त्रियां ङीष्। अलिन्दी।

**अलिपक** पु० कुत्सितवर्णेन लिप्यते लिप-बा० कर्म्मणि वुन्। १कोकिले २भृङ्गे ३कुक्कुरे च मेदि०।

**अलिपत्रिका** स्त्री अलिर्वृश्चिक इव पत्रमस्याः वा कपि अत इत्त्वम्। वृश्चिकपत्राख्यलतायाम्। अलिपर्ण्यप्यत्र।

**अलिप्रिय** न० ६त०। १कोकनदे रक्तोत्पले २भ्रमरप्रिये त्रि० ३पाटलावृक्षे राजनि०।

**अलिमक** पु० अलिरिव मक्कते-मक्क अच् पृ०कलोपः। १भेके २कोकिले ३भृङ्गे ४मधूकवृक्षे ५पद्मकेशरे च मेदि०।

**अलिमोदा** स्त्री अलीन् मोदयति मुद+णिच् अण्। गणिकारीवृक्षे

**अलिम्पक** पु० कुत्सितं लिप्यते वर्णेन लिप-बा कर्म्मणि श न०त० संज्ञायां कन्। १भृङ्गे २कोकिले ३मधूकवृक्षे ४भेके ५पद्मकेशरे च।